श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीमद्वेङ्कटाध्वरि विरचितम्

# ॥ श्रीलक्ष्मीसहस्रम् ॥

## ॥ प्रादुर्भावस्तबकः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ प्रादुर्भावस्तबकः ॥

भजे दुग्धाम्बुधिं यत्र परिष्कर्तुं हरेरुरः।
कठिनं सुकुमारं च रत्नं प्रादुरभूद् द्विधा॥ १॥

चतुर्मुखादीन् जगदम्ब डिम्भान् दुग्धैर्बहून् वर्धयितुं समृद्धैः।
पयः पयोधौ भवती दयालुः सत्यं प्रजज्ञे सह कामधेन्वा॥ २॥

त्वयोज्ज्वलं दुग्धपयोधिमध्ये महोद्वयं देवि सहोदियाय।
हरेरुरोभूषणमेकमासीदन्यच्छिरोभूषणमष्टमूर्तेः॥ ३॥

जीवं जीवं प्रत्युदारां समृद्धिं कर्तुं हर्तुं कञ्जवासे तमांसि।
सर्वं त्रातुं सत्कदम्बं पुराब्धेः चान्द्री मूर्तिर्जायते तावकी च॥ ४॥

विश्वासेचनकं मुखं तव पयः सिन्धोरुदञ्चत्तदा
    शङ्कित्वा विगलत्कलङ्कमपरं चन्द्राङ्कुरं शङ्करः।
न्यस्तं मस्तपदे विधुं प्रथमतो नूनं भृशं न्यूनमि-
    त्यम्ब भ्रंशयितुं स्तुवन्निव शिरःकम्पं रमे निर्ममे॥ ५॥

दातुं त्वां पुरुषोत्तमाय तनयां पद्मे गृहीतव्रतः
    प्रादात् कामगवीं मुदे सुमनसां पानीयमप्यम्बुभिः।
कञ्चित्सप्तिमनुत्तमं मघवते कल्पद्रुमं चेष्टदं
    सर्वज्ञाय सितांशुकं धृतजटावर्गाय दिग्वाससे॥ ६॥

हर्षादब्धेरमृतकलशं त्वाददे देवसङ्घः
    श्रीमानुच्चैःश्रवसममरक्ष्मापतिश्चन्द्रमीशः।
तेषामेकं किल न जगृहे त्वां शुभामेव शार्ङ्गी
    पद्मे सारग्रहणनिपुणः पारिशेष्याद् ग्रहीतुम्॥ ७॥

छाया मुखे जननि चान्द्रमसी तवास्मिन् कल्पद्रुपल्लवरुचिः करयोः पदोश्च।
सौधो रसो वचसि तद्वचनं न मिथ्या भ्रातृश्रियं सहभुवः परिबिभ्रतीति॥ ८॥

सुधादयः सन्तु तथापि तोयधिः ध्रुवं भवत्यैव भवत्यपत्यवान्।
गुणा रमे जाग्रतु विक्रमादयो गुणी महोदारतयैव भूपतिः॥ ९॥

भ्राम्यत्पन्नगवक्रकोटरमरुन्नुन्नोर्मिसङ्घट्टनाद्
झाटित्योर्ध्वविसारिदुग्धकणिकानिष्पन्नपुष्पाञ्जलिः।
सिन्धुर्मुग्धवसुन्धराभृदुदयद्धुन्धुध्वनिच्छद्मना
स्तुत्वा माधवमद्भुतामलभत त्वामम्ब कन्यामणिम्॥ १०॥

सिन्धोरोधः स्थपुटविलुठन्मन्थलब्धावतारैः
धुन्धुङ्कारैस्त्वदुदयमहे दुन्दुभिश्रीमति श्रीः।
प्राञ्चो झञ्झानिलपटुनटोन्नाटितप्रौढवीची
वल्ली हल्लीसक मकलयन्नन्तरुल्लीढहर्षाः॥ ११॥

बर्हं भ्रान्त्वा चिकुरमुदधेरुद्भवन्त्या भवत्या
बद्धा मन्थक्षितिभृति सुरैः पन्नगाः खिन्नगात्राः।
तत्कालैकोचितमतिजुषस्त्रासतस्तस्य चेष्टां
राजीवाक्षप्रणयिनि भृशं रज्जुतामभ्यनैषुः॥ १२॥

आलोक्य तत्रभवतीमवतीर्णरूपां वृष्टा मुदा सुमनसः सुमनः प्रधानैः।
पिण्डीभवद्भिरखिलाम्ब पयः पयोधौ डिण्डीरखण्डनिवहैः सममप्लवन्त॥ १३॥

अम्ब स्वयं त्वयि चिरादवतीर्णवत्यां
मन्थश्रमव्यपनयाय मखाशनानाम्।
श्रान्ताहिरज्जुकबलीकृतिचिन्तयेव
क्षीरोदरोधसि शनैरनिलश्चचार॥ १४॥

सान्द्रोत्कण्ठामसृणमधुजित्सादरापाङ्गधारा
सध्रीचीभिः श्वसनविसरद्दुग्धवीचीभिरब्धिः।
उद्वाहाख्यं कमपि भवतीमुत्सवं लप्स्यमानां
मातस्तातो मधुरमनयन्मङ्गलस्नानकर्म॥ १५॥

सुधोदधिसमुल्लसत्सुरतरुच्छटान्तर्गते
　　मनोज्ञमणिमण्डपे महति रत्नसिंहासने।
स्थितं मणिसरोरुहे त्रिदशसुन्दरीसेवितां
　　जयाय भवतीमहं जननि सन्ततं चिन्तये॥ १६ ॥

अभ्यर्णस्फुरदप्सरः करधृतैरुद्दामदुग्धाम्बुधिः
　　स्वैरोत्सृत्वरवीचिकासहचरैः संवीजितां चामरैः।
हस्तालङ्कृतपङ्कजामभिनवाकल्पैरनल्पैः शुभाम्
　　अम्ब त्वामुषसि स्मरामि जगतामातङ्ककुलङ्कषाम्॥ १७ ॥

भूयासुस्ते त्वदीया मयि हरिदयिते स्थूललक्ष्याः कटाक्षा
　　यल्लिप्साव्यग्रभर्गाद्यमरविरचितैरञ्जलीनां प्रपञ्चैः।
मन्थाद्रिक्षोभदुःस्थं कलशजलनिधेर्मध्यमुत्सृज्य वेलां
　　प्राप्तै रेजे सरोजैरिव नवरजनीनायकालोकमूकैः॥ १८ ॥

अग्रे मुरारेरविन्दपीठे हरित्करीन्द्रैरभिषिच्यमानाम्।
अवेक्ष्य पुत्रीमखिलेश्वरीं त्वां आनन्दसिन्धौ निममज्ज सिन्धुः॥ १९ ॥

प्रसभमुदधिकन्ये पश्यतां देवतानां
　　परमपुरुषवक्षः पीठमाढौकथास्त्वम्।
सह दयिततमेन स्वैरकेलौ सतीनां
　　न खलु निजशिशूनां सन्निधिर्व्रीडहेतुः॥ २० ॥

कलितकलशसागरोर्मिगङ्गं कमपि मुकुन्दमहः कलिन्दजौघम्।
कनकसुहृदभूषयत्तवाभा विततिरतीव रमे सरस्वतीव॥ २१ ॥

द्युनदीशिशिरं शिरः पुरारेः भजतीन्दुर्भवती दयारसार्द्रम्।
हृदयं मुरहन्तुरब्धिजे वां उचितैव स्थितिरुद्भवानुरूपा॥ २२ ॥

कमले तोषयितुं त्वां कान्तभुजान्तरनिशान्तमुपयान्तीम्।
प्रायच्छत्तमथास्मै प्रत्नं रत्नगणमम्बुधिर्हरणम्॥ २३ ॥

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे प्रादुर्भावस्तबकः ॥